रोल नं0 [ ] [ ] [ ] [ ] [ ] [ ] [ ] [ ]

मुद्रित पृष्ठों की संख्या : 6

**105** **405 (IBV)**

# 2015

# संस्कृतम्

समय : 3 घण्टे ] [ पूर्णांक : 100

## खण्ड – 'क' (अपठितांश – अवबोधनम्)

1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत। (निम्नलिखित गद्यांश को पढ़कर प्रश्नों के उत्तर लिखिए) :
अयं संसारः कर्मभूमिः अस्ति। अस्मिन् संसारे यावन्तः जनाः निवसन्ति, तेषां पृथक्–पृथक् कर्तव्यानि भवन्ति। एतानि कर्तव्यानि अनेकविधानि भवन्ति। कानिचिद् व्यक्तिगतानि कानिचिद् पारिवारिकाणि, कानिचिद् सामाजिकानि, कानिचित् नित्यानि भवन्ति कानिचित् नैमित्तिकानि। एतेषां सर्वेषां कर्त्तव्यानां पालनं मनुष्यस्य व्यक्तिगतहिताय देशहिताय च परमावश्यकं भवति। परमद्य जनेषु कर्तव्यपालनं प्रति न कापि निष्ठा। कऽपि श्रमेण सत्यतया, निष्ठया च कार्यं कर्तुं न वाञ्छन्ति। अल्पेन एव प्रयासेन ते कार्यसिद्धिम् इच्छन्ति। ते केवलं स्वार्थसाधनं कर्तुम् इच्छन्ति। अधिकाराय तु सर्वे प्रयतन्ते परं कर्तव्यं प्रति कोऽपि ध्यानं न ददाति। सत्यमेतद् यावद् वयं परिश्रमपूर्वकं च स्वकर्तव्यानि न पालयामः तावद् देशस्य समाजस्य च उन्नतिः भवितुं न अर्हति। कर्तव्यपालनम् एव आत्मनः देशस्य च उन्नतेः मूलमन्त्रम् अस्ति।

(क) एकपदेन उत्तरत। (एक पद में उत्तर दीजिए) : ½ ×4 = 2
 (i) कर्माणि कति विधानि सन्ति ?
 (ii) उन्नतेः मूलमन्त्रं किम् अस्ति ?
 (iii) जनाः किं विहाय केवलम् अधिकाराय प्रयतन्ते ?
 (iv) संसारोऽयं कीदृश अस्ति ?

(ख) संस्कृतस्य पूर्णवाक्येन उत्तरत। (संस्कृत के पूर्ण वाक्य में उत्तर दीजिए) : 1×2 = 2
 (i) कर्तव्यानां पालनं किमर्थम् आवश्यकम् ?
 (ii) देशस्य उन्नतिः कदा भवितुम् अर्हति ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत। (निर्देश के अनुसार प्रश्नों के उत्तर दीजिए) : 1×4 = 4
 (i) "ते केवलं स्वार्थसाधनं कर्तुम् इच्छन्ति" इत्यत्र 'ते' सर्वनामपदं कस्मै प्रयुक्तम् ?
 (ii) 'प्रयासेन' इति पदस्य विशेषणपदं चित्वा लिखत।
 (iii) "एतानि कर्तव्यानि अनेकविधानि सन्ति।" अत्र किं विशेष्यपदम् ?
 (iv) 'प्रयत्नं कुर्वन्ति' एतदर्थं किं क्रियापदं प्रयुक्तम् ?

(घ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। (इस गद्यांश के लिए समुचित शीर्षक लिखिए)। 2

## खण्ड – 'ख' (संस्कृतेन रचनात्मकं कार्यम्)

2. सुषमा संस्कृतेन अध्ययनार्थं प्रयागं गतवती। किञ्चित् कालान्तरं सा स्वपितरम् एकं पत्रम् अलिखत्। तत् पत्रं मञ्जूषायां प्रदत्तैः उचित शब्दैः पूरयित्वा पुनः उत्तरपुस्तिकायाम् लिखत। ½ ×10 = 5
(सुषमा संस्कृत विषय से अध्ययन करने के लिए इलाहाबाद गयी। कुछ समय पश्चात् उसने अपने पिता को एक पत्र लिखा। उस पत्र को मञ्जूषा में दिये गये उचित शब्दों से पूरा कर पुनः उत्तरपुस्तिका में लिखिए।) :

| | |
|---|---|
| **मञ्जूषा** : | कृपापत्रम्, सन्निकटा, पितृचरणयोः, सुषमा, प्रयागविश्वविद्यालयतः, स्वान्तम्, अनुभवामि, गरिमा, नितराम्, मातुश्चरणयोः |

(i).............................
तिथि.........................

श्रीमतो (ii)..................................

सादरं प्रणतिततिः

अत्र कुशलं तत्रास्तु। मया भवदीयं (iii)...........................प्राप्तम्। अवगतं च निखिलं वृत्तम्। मम प्रथम सत्रार्धपरीक्षा (iv)...........................वर्तते। तस्माद् अद्यत्वे अध्ययनकर्मण्येव (v)........................... व्यापृताऽस्मि। संस्कृत विषयेन सह स्नातककक्षायां प्रवेशम् अवाप्य अतितरां प्रसन्नताम् (vi)......................।

संस्कृतसाहित्ये वेदानां गुण (vii).........................रामायण–महाभारतयोः हृदयावर्जकत्वम्, कविकुलगुरु कालिदासादीनां प्रकृतिचित्रणम्, भारतीय संस्कृतेः महनीयता, भाषाविज्ञानस्य वैज्ञानिक सरणिः मनोज्ञता च (viii)...........................में प्रतिपलं प्रसादयति।

आशासे यत् परीक्षायां समेष्वपि विषयेषु प्रथमश्रेण्याः सफला भविष्यामि। परीक्षानन्तरं शीघ्रमेव गृहं प्रति प्रस्थास्ये।

पूज्यायाः (ix)........................... मम प्रणतिः वाच्या।

भवदीया आज्ञाकारिणी पुत्री
(x)......................................
स्नातक प्रथम वर्षीया

3. मञ्जूषायां प्रदत्त शब्दसूची साहाय्येन अधोदत्तां लघुकथां पूरयित्वा उत्तरपुस्तिकायां पुनः लिखित। $\frac{1}{2}\times10=5$
(मञ्जूषा में दिये गये शब्दों की सहायता से निम्नलिखित लघुकथा को भरकर उत्तरपुस्तिका में पुनः लिखिए)

चन्द्रगुप्तः मगधराज्यस्य राजा आसीत्। (i)................सः प्रधानामात्येन सह प्रासादगवाक्षस्य पार्श्वे (ii)................सम्भाषणम करोत्। सम्भाषणावसरे सः चाणक्यं दृष्ट्वा मन्दहासं प्रकटयन् अवदत् – "अमात्यवर्य! भवान् बुद्धिमान् कुशलश्च इति तु सत्यमेव। किन्तु न रूपवान् इति।"

गाम्भीर्येण अपृच्छत् चाणक्यः राजन्! स्यात् नाम एतत्। किन्तु रूपमात्रेण किं वा भवेत् ? "रूपम् एव प्रशस्यते (iii)................। रूपवेषादिकं दृष्ट्वा एव खलु आदरम् अनादरं वा दर्शयन्ति जनाः ?" इति अवदत् चन्द्रगुप्तः। तस्य वचनं श्रुत्वा चाणक्यः प्रत्युत्तरं किमपि अवदन् भटद्वारा (iv)................द्वौ घटौ आनायितवान्। तयोः एक सुवर्णस्य अपरश्च मृदः। द्वयोरपि कुम्भयोः जलं पूरयित्वा चाणक्यः राज्ञः (v)...... आनीतवान्।

आदौ सुवर्णमये घटे स्थितं जलं राज्ञे दत्तम्। तत् (vi).............दीत्वा असन्तोषं प्रकटयन् चन्द्रगुप्तः– "अहो एतत् तु उष्णं जलम्। शीतलं जलं दीयताम् इति सेवकम् (vii)..............। किं पुनरपि सुवर्णघटस्थं जलं दीयताम् इति वदेयम् ?" अपृच्छत् चाणक्यः चन्द्रगुप्तम्।

"मास्तु! मृत्कुम्भस्थं जलं ददातु नाम सः। मृद्घटस्थं जलं भवति शीतलम्"–राजा अवदत्। तदा चाणक्यः अपृच्छत्–"किं सुवर्णघटः न सुन्दरः ?"

तदा राज्ञा (viii)............यत् यथा सुन्दरः सुवर्णघटे अपि स्थितं जलम् उष्णम् असुन्दरे (ix).............. स्थित जलं च शीतलं तथा जनाः गुणैः (x).........न तु सौन्दर्येण इति। अतः स चाणक्यं क्षमाम् अयाचत्।

| **मञ्जूषा** : समक्षम्, मृद्घटे, किञ्चित्, लोके, आदिशत्, उपविश्य, शोभन्ते, एकदा, अवगतम्, पाकशालायाः |
|---|

4. अधोलिखितेषु **एकं विषयम्** अधिकृत्य पञ्चवाक्यमितम् एकम् अनुच्छेदं संस्कृतेन लिखत। 1×5 = 5
(नीचे लिखे किसी **एक विषय** पर पाँच वाक्यों का संस्कृत में एक अनुच्छेद लिखिए।)
(i) वसन्तोत्सवः (ii) सदाचारः (iii) देवभूमिः

## खण्ड – 'ग' (अनुप्रयुक्त – व्याकरणम्)

5. अधोलिखितेषु वाक्येषु रेखांकित पदेषु सन्धि–विच्छेदं कुरुत। 1×6 = 6
(निम्नांकित वाक्यों में रेखांकित पदों में सन्धि–विच्छेद कीजिए।)
(i) ततो मुहूर्ताभ्युदिते जगच्चक्षुषि भास्करे।
(ii) शठैः सहस्रैरपि शिक्ष्यमाणः।
(iii) शूरं कृतज्ञं दृढसौहृदञ्च।
(iv) हस्तेनैव विसर्जितः।
(v) यान्यनवद्यानि कर्माणि तानि सेवितव्यानि।
(vi) सत्यपि दीपप्रकाशे कमप्यनवलोकयन्।

6. अधोलिखितेषु वाक्येषु रेखांकितपदानां विग्रहा लेखनीयाः। 1×6 = 6
(नीचे लिखे हुए वाक्यों में रेखांकित पदों का विग्रह कीजिये।)
(i) पुनः स एव पादध्वनिरश्रावीति। (ii) दिलीप इव राजेन्दुः।
(iii) एवमपि त्वया सौम्य! विज्ञाप्यो वसुधाधिपः। (iv) पतिपत्न्यौ तिवर्गं साधयतः।
(v) राजा च सौधं निर्जनं विधाय। (vi) सत्याय मितभाषिणाम्।

7. निम्नलिखितेषु वाक्येषु कोष्ठान्तर्गत प्रकृति प्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत। 1×8 = 8
(नीचे लिखे हुए वाक्यों में कोष्ठक के अन्तर्गत प्रकृति के साथ निर्दिष्ट प्रत्यय जोड़कर खाली स्थान भरिए।)
(i) शोकादवचनाद् राज्ञा हस्तेनैव.................................। (वि+सृज्+क्त)
(ii) न दुर्जनः .........................................................उपैति। (सज्जन+तल्)
(iii) तद्गुणैः कणम्..........................चापलाय प्रचोदितः। (आ+गम्+ल्यप्)
(iv) विप्रः जन्मपत्रिकां विधाय...........................................। (वच्+क्तवतु)
(v) भार्या भर्त्तुः.......................................................भवति। (सहाय+इन्)
(vi) स्त्रियो बालाश्च न किमपि..........................................। (प्रछ्+तव्यत्)
(vii) स्वाधीनताऽऽर्यभुवि.........................................समाना। (मूर्ति+मतुप्)
(viii) अहं जीवनपथे.........................................स्वयं समर्था। (चल्+तुमुन्)

8. अधोलिखितेषु वाक्येषु कर्तृक्रियापदयोः अन्वितिः क्रियताम्। 1×5 = 5
(अधोलिखित वाक्यों में कर्ता और क्रिया की अन्विति कीजिए।)
(i) वसुधाधिपः यथामां न.......................................। (स्मरेयुः / स्मरेत्)
(ii) नवनृपतिविमर्शे प्रजानां शंका.........................। (नास्ति / न सन्ति)
(iii) मोदं च नृपति..................................................। (गतिः / गतः)
(iv) न परिभोगैः..........................................भ्रातरः मे। (वञ्चिताः / वञ्चितम्)
(v) त्वादृक्षा एव पुरस्कार भाजनानि.....................। (भवति / भवन्ति)

**अथवा**

अधोलिखितेषु वाक्येषु विशेषणविशेष्ययोः अन्वितिः क्रियताम्।
(नीचे लिखे वाक्यों में विशेष्य–विशेषण की अन्विति कीजिए।)
(i) भव्यमूर्तिः............................................................दृष्टः। (संन्यासिनः / संन्यासी / संन्यासिना)
(ii) भोजराजेन.................................................दक्षिणापथः। (भोक्ता / भोक्तव्यः / भोक्तव्यम्)
(iii) यत्कृते...........................क्लेशे राज्ये मे न मनोरथः। (महति / महता / महान्)
(iv) युवतिरहितं.........................कर्तुं यतश्छलितावयम्। (लोके / लोकेन / लोकम्)
(v) मनीषिणां.................................................मनु आसीत्। (माननीयः / माननीये / माननीयस्य)

9. अधोलिखितेषु वाक्येषु कोष्ठान्तर्गतशब्देषु उपपदविभक्तिं प्रयुज्य रिक्तस्थानपूर्तिः क्रियताम्। 1×5 = 5
(नीचे लिखे वाक्यों में कोष्ठक में दिए गये शब्दों के साथ उपपद विभक्ति का प्रयोग करके रिक्त स्थान भरिए।)
(i) जरामरणनाशार्थं प्रविष्टोऽस्मि..............................। (तपोवन)
(ii) तस्या कस्मिन्.................................................स्पृहा। (फल)
(iii) स्वशिशूनां चरित्रनिर्माणं..........................अधीनम्। (मातृ)
(iv) सहोदरमपहाय राज्यं............................प्रयच्छामि। (पुत्र)
(v) न वयं दौवारिकाः...................अप्याज्ञां प्रतीक्षामहे। (ब्रह्मन्)

## खण्ड – 'घ' (पठितांश – अवबोधनम् भाग–I)

10. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत। (नीचे लिखे गद्यांश को पढ़कर प्रश्नों के उत्तर दीजिए।) :

संवृत्ते किञ्चिदन्धकारे भुशुण्डीं स्कन्धे निधाय निपुणं निरीक्षमाणः, आगत–प्रत्यागतं च विदधानः, प्रतापदुर्गदौवारिकः कस्यापि पादक्षेपध्वनिमिवाश्रौषीत्। ततः स्थिरीभूय पुरतः पश्यन् सत्यपि दीपप्रकाशे कमप्यनवलोकयन् गम्भीरस्वरेणैवम् अवादीत् – "कः कोऽत्र भोः ? कः कोऽत्र भोः ?" इति।

अथ क्षणानन्तरं पुनः स एव पादध्वनिरश्रावीति भूयः साक्षेपमवोचत्–''क एष मामनुत्तरयन् मुमूर्षुः समायाति बधिरः ?

ततो ''दौवारिक! शान्तो भव किमिति व्यर्थं मुमूर्षुरिति बधिर इति च वदसि ?'' इति वक्तारमपश्यतैवाऽऽकर्णि मन्द्रस्वरमेदुरा वाणी।

(क) एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।) : ½ × 2 = 1

(i) पादक्षेपध्वनिं क अश्रौषीत् ? (ii) दौवारिकः केन स्वरेण अवादीत् ?

(ख) पूर्णवाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिए।) : 1

(i) दौवारिकः कदा स्थिरी भूतः ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत। (निर्देशानुसार प्रश्नों के उत्तर दीजिए।) 1×3 = 3

(i) 'निधाय' इत्यत्र प्रयुक्तः प्रत्ययः कः ? (ii) 'क्रोधेन सहितम्' इत्यर्थे प्रयुक्तं पदं किमत्र ?

(iii) 'आगतम्' अस्य विलोमपदं गद्यांशात् चित्वा लिखत।

11. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत। (नीचे लिखे नाट्यांश को पढ़कर प्रश्नो के उत्तर दीजिए।)

ऋतध्वजः – माता एव प्रथमा आचार्या इत्यस्ति मे अवधारणा। नारी एव समस्तसृष्टेः निर्मात्री। परं कथनेन किम् ? परीक्ष्य एव ज्ञास्यति अत्रभवती। परीक्षार्थमुद्यतोऽस्मि गृहस्थाश्रम–प्रयोगशालायाम्।

मदालसा – स्वीकृतः प्रस्तावः।

कुण्डला – दिष्ट्या वर्धेथां युवाम्। मित्रवर, गन्धर्वकन्या मदालसा गान्धर्वविवाहविधिना वृणोति अत्र–भवन्तम्। आकारये अहं कुलगुरुं तुम्बुरूम्। असौ अग्निं साक्षीकृत्य आशीर्वचांसि वक्ष्यति।

ऋतध्वजः – प्रथमं तु सखीवचनं श्रोष्यावः। तदनु स्वयमेव कुलगुरुं पितरौ च सभाजयितुं गमिष्यावः।

कुण्डला – परस्परप्रीतिमतोः भवतोः उपदेशस्य नास्ति कोऽपि अवकाशः तदापि सखीस्नेहः मां भाषयति–भर्त्रा सदैव भार्या भर्तव्या रक्षितव्या च। यतो हि धर्मार्थकामसंसिद्धये यथा भार्या भर्तुः सहायिनी भवति तथा न कोऽपि अन्यः। परस्परमनुव्रतौ पतिपत्न्यौ त्रिवर्गं साधयतः।

(क) एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।) : ½ × 2 = 1

(i) नारी कस्याः निर्मात्री ? (ii) धर्मार्थकामसिद्धये का सहायिनी भवति ?

(ख) पूर्णवाक्येन उत्तरत (पूर्णवाक्य में उत्तर दीजिए।) : 1

(i) मदालसा ऋतध्वजौ किं कर्तुं स्वयमेव गमिष्यतः ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत। (निर्देशानुसार प्रश्नों के उत्तर दीजिए।) 1×3 = 3

(i) 'इत्यस्ति' अस्य सन्धि–विच्छेदं कुरुत। (ii) 'वक्ष्यति' इत्यत्र पदे कः धातुः ?

(iii) 'प्रत्यक्षीकृत्य' अस्य समानार्थकपदं नाट्यांशात् चित्वा लिखत।

12. अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत। (नीचे लिखे पद्यांश को पढ़कर प्रश्नों के उत्तर दीजिए।):

कर्णामृतं सूक्तिरसं विमुच्य दोषेषु यत्नः सुमहान् खलानाम्।
निरीक्षते केलिवनं प्रविश्य क्रमेलकः कण्टकजालमेव।।

(क) एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।) : ½ × 2 = 1

(i) अस्मिन् पद्ये कर्णामृतं किं कथ्यते ? (ii) क्रमेलकः कुत्र कण्टकजालं निरीक्षते ?

(ख) पूर्णवाक्येन उत्तरत (पूर्णवाक्य में उत्तर दीजिए।) : 1

(i) किं विमुच्य दोषेषु सुमहान् यत्नः ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत। (निर्देशानुसार प्रश्नों के उत्तर दीजिए।) 1×3 = 3

(i) 'विमुच्य' अत्र प्रकृति–प्रत्ययनिर्देशं कुरुत। (ii) अस्मिन् पद्ये क्रियापदं किम् ?

(iii) 'उष्ट्रः' अस्य पर्यायवाचिपदम् अत्र किं प्रयुक्तम् ?

13. निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए।) :

(क) "कथं विश्वासघातं स्वामिवञ्चनं च शिक्षयसि"?–इमां पंक्तिं कः कम् प्रति कथयति ? 1+1 = 2

(ख) "सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः।"

(i) एषा पंक्तिः कस्मात् ग्रन्थात् संकलिता ? (ii) अस्य ग्रन्थस्य लेखकः कः ? 1+1 = 2

14. अधोप्रदत्त भावार्थत्रये शुद्ध भावार्थस्य चयनं कृत्वा लिखत।

(नीचे लिखे गये क, ख खण्डों में प्रत्येक के तीन भावार्थों में से शुद्ध भावार्थ चयन करके लिखिए।) 2+2 = 4

(क) "विद्यावतां वस्तुत एव रूपम्"

**भावार्थः** (i) विद्या एकम् वस्तु अस्ति।

(ii) विदुषां विद्या एव वास्तविकं रूपमस्ति।

(iii) विद्वान्स एव रूपवन्तो भवन्ति।

(ख) "अस्मद्राज्यभ्रंशो भवत उद्योगं जनयति"

**भावार्थः** (i) अस्मद् राज्यभ्रंशो भवतः क्रोधस्य कारणमस्ति।

(ii) वयं राज्यभ्रंशे उद्योगं करिष्यामः।

(iii) उद्योगेन राज्यनाशो भविष्यति।

**अथवा**

अधोदत्त श्लोकस्य प्रदत्तभावार्थं मञ्जूषादत्तपदैः पूरयित्वा लिखत।

(नीचे दिए गये श्लोक के भावार्थ को मंजूषा में दिए गये पदों से पूर्ण करके लिखिए।) : ½ ×8 = 4

एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना।

आह्लादितं कुलं सर्वं यथा चन्द्रेण शर्वरी॥

**भावार्थः** अस्मिन् संसारे एकलः विद्यावान् (i)............च सुपुत्रः तथैव (ii)............कुलम् आनन्दयति, यथा शशिः (iii)...............प्रकाशवान् भूत्वा समस्तमपि भूमण्डलम् (iv)..............। यद्यपि रात्रौ लक्षाधिकाः तारकाः (v)..........................तत्कार्यं न (vi)..................भवन्ति। (vii)........................ सहस्राधिकाः कुपुत्राः कुलस्य (viii)..........................वृद्धौ न जायन्ते।

| **मञ्जूषा** – अपि, सज्जनः, रात्रौ, यशः, आहलादयति, सम्पूर्णम्, तथैव, समर्थाः |
|---|

15. अधोलिखित श्लोक द्वयस्य प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत।

(नीचे दो श्लोकों का अन्वय दिया गया है, उनमें रिक्त स्थानों की पूर्ति करके अन्वय पुनः लिखिए।):

(क) ततो मुहूर्ताभ्युदिते जगच्चक्षुषि भास्करे। भार्गवस्याश्रमपदं स ददर्श नृणां वरः॥

**अन्वयः** – ततः मुहूर्त (i).............भास्करे (ii)..............नृणां (iii).............सः भार्गवस्य (iv)...............ददर्श। ½ ×4 = 2

(ख) न दुर्जनः सज्जनतामुपैति शठः सहस्त्रैरपि शिक्ष्यमाणः।

चिरं निमग्नोऽपि सुधा समुद्रे न मन्दरो मार्दवमभ्युपैति॥

**अन्वयः**– सहस्रै (जनैः) शिक्ष्यमाण (i)...........दुर्जनः शठ (ii)...........न उपैति। (iii).............सुधासमुद्रे निमग्नः अपि (iv)............मार्दवम् न अभ्युपैति। ½ ×4 = 2

16. अधोलिखितानां 'अ' स्तम्भस्य वाक्यांशानां 'ब' स्तम्भस्य वाक्यांशैः सह उचितमेलनं कुरुत। 1×4 = 4

(निम्नलिखित 'अ' स्तम्भ में प्रदत्त वाक्यांशों का 'ब' स्तम्भ में दिये गये वाक्यांशों के साथ उचित मिलान कीजिए।)

| स्तम्भ 'अ' | स्तम्भ 'ब' |
|---|---|
| (क) आकरः सदृशः प्राज्ञः | (i) स राजा परिपाल्यताम्। |
| (ख) यदि तेऽस्ति धनुश्लाघा | (ii) स्वजनोऽपि विपर्यये। |
| (ग) बली बलं वेत्ति | (iii) प्रज्ञया सदृशागमः। |
| (घ) जनी भवति भूयिष्ठं | (iv) न वेत्ति निर्बलः। |

17. अधोलिखितेषु वाक्येषु रेखांकित पदानां प्रसंगानुसारम् उचितार्थं कोष्ठकात् चित्वा लिखत। 1×4 = 4
(निम्नलिखित वाक्यों में रेखांकित शब्दों के प्रसंगानुसार उचितार्थ कोष्ठकों से चुनकर लिखिए)।

(क) निस्तीर्णमिति वाजिनम् (पक्षिणम् / अश्वम् / राजानम्)

(ख) स ताभ्यो बलिमग्रहीत् (करम् / बालम् / कुण्डलम्)

(ग) भुवनेश्वरीविपिने रात्रौ न हन्तव्यः (प्रासादे / आश्रमे / वने)

(घ) सर्वोऽप्येवं मृदुः परिभूयते (मधुः / कोमलः / दारुणः)

## खण्ड – 'घ' (संस्कृत साहित्य परिचयः भाग–II)

18. अधोलिखितानां कवीनां देशकाल कृतीनां यथानिर्देशं नामानि लिखत।
(निम्नलिखित कवियों के देश, समय और रचनाओं के नाम निर्देशानुसार लिखिए।) :

(क) कवयः 1×3 = 3

(i) विल्हणः
(ii) ईशदत्त शास्त्री
(iii) अश्वघोषः

} देशः

(ख) कवयः 1×3 = 3

(i) भर्तृहरिः
(ii) बल्लालसेनः
(iii) पण्डिता क्षमारावः

} कालः

(ग) कवयः 1×4 = 4

(i) भासः
(ii) विल्हणः
(iii) वेदकुमारी घईः
(iv) नारायण पण्डितः

} काऽपि एका रचना

**अथवा**

(क) निम्न प्रदत्त वाक्येषु कोष्ठकेभ्यः चित्वा उचित शब्दैः रिक्त स्थान पूर्तिः क्रियताम्। 1×5 = 5
(निम्नलिखित वाक्यों में कोष्ठकों से चुनकर उचित शब्दों से रिक्त स्थानों की पूर्ति कीजिए।) :

(i) शिवराजविजयस्य रचयिता......................अस्ति। (भासः / कालिदासः / अम्बिकादत्त व्यासः)

(ii) राजतरंगिणी......................................ग्रन्थ अस्ति। (ऐतिहासिक / धार्मिक / सामाजिक)

(iii) भासस्य नाट्यकृतयः..................................सन्ति। (दश / द्वादश / त्रयोदश)

(iv) कालिदासस्य मेघदूतम्............................ अस्ति। (गीतिकाव्यम् / गद्यकाव्यम् / चम्पूकाव्यम्)

(v) यजुर्वेदीय......................................................अस्ति। (प्रश्नोपनिषद् / केनोपनिषद् / तैत्तिरीयोपनिषद्)

(ख) संस्कृत महाकाव्यस्य पञ्चविशेषताः लिखत। 5
(संस्कृत महाकाव्य की पाँच विशेषताएं लिखिये।)

*******